- Title – प्राशौचनिर्णयः
- Accession No – Title –
- Accession No –
- Folio No/ Pages – ५/8 पृष्ठ
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – नेत्रशाक्यः माल्यवत्तद्द्रष्टृ गौरीशावपि प्रणिपत्यडगं-
- End – श्री लक्ष्मी नरहरेः नागभट्टाभिधीयतेनाशिष्यप्रा-
  शौचनिर्णयः संपूर्णः ।
- Colophon-
- Illustrations -
- Source -
- Subject - ~~[illegible]~~ अज्ञात
- Revisor -
- Author - श्रीमद्भट्टोजिदीक्षित विरचित

1. Remarks- अपूर्ण, ९ मात्र पत्र उप०

नवीन और ज्योतिप्रकाश शास्त्री

नेष्वराद्यः॥ माधवस्तु देशांतरेपि सपिंडमरणे अहं। सद्यः शौचंतु समानोदकमरणविषयमि
त्याह। दशाहाद्यवच्छिन्नोपः स्वाशौचकालस्तन्मध्ये द्वितीयादौ दिवसे जननमरणयोः श्रवणे
तु भवशिष्टैरेव दिवसैः शुद्धिः। असहं योजनद्वयं गच्छन्पुरुषः यत्र मृतस्य वार्त्तामाशौचकाल
मध्ये प्रापयितुं नशक्नोति तद्देशांतरं। तथा च विप्रस्य दशाहाशौचिनः विंशतियोजनैर्देशांतरं
क्षत्रियस्य द्वादशाहाशौचनस्य तु विंशतियोजनैरित्यादि। तथा। एकहपाक्षिणी त्रिरात्राशौचे
शुद्धिस्तु षड्योजनरूपदेशांतराणि चेज्ञानि। मातापितृमरणे तु विशेषः॥ पितरौ चेन्मृतौ स्यातां
दूरस्थोपि हि पुत्रकः॥ श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत्॥ मातुः सपत्न्यां तु त्रिदिनाद्दं
चहीनवर्णायामिसाकुः। मातापित्रमरणे दशाहमित्युपक्रम्य स्त्रीपुरुषयोः परस्परं चैवं दशका
लाविशेषणसंपूर्णमाशौचं सवर्णानां सपत्नीपुत्रांतमस्पर्थ सोरोत्केः॥ ॥इति सगोत्राशौ
चप्रकरणम्॥ ॥पित्रोरुपरमे मूढकन्यायां त्रिरात्रं। नरक्षिजे। दौहित्रे। सहाध्यायिनि। वंधुत्रै

कानं=१०

ये। शिष्ये। श्वशुरे। श्वश्र्वां। मित्रे। भगिन्यां। भागिनेये। मातामह्यां। पितृष्वसरि। मातृष्वसरि। मा
तुले। मातुलान्यां च। पक्षिणी। वंधुत्रयं तु आत्मपितृष्वसुः पुत्राः आत्ममातृष्वसुः सुताः आत्म
मातुलपुत्राश्च विज्ञेया आत्मवांधवाः॥१॥ पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः पितुर्मा
तुलपुत्राश्च विज्ञेयाः पितृवांधवाः॥२॥ मातुः पितृष्वसुः पुत्राः मातुर्मातृष्वसुः सुताः॥ मातुर्मा

विनंतु ५

राम

शिशुमरणे दहनखननयोरविशेषेणात्रिरात्रं स्त्र्यपत्यमरणे तु विशेषः । त्रिपुरुषपर्यंतं ज्ञातीनामाचौ
लात्सद्यः शुद्धिः । ततो वाग्दानात्प्राक् एकाहमाशौचं । ततो विवाहाद्र्वाक्पतिपक्षे पितृपक्षे च त्र्य
हं । पित्रोस्तु जातदंतायां कन्यायामेकाहः । ततस्त्र्यहं । संस्कृतायास्त्वपि पितृगेहे मृतायां तु पित्रोस्त्र्यहमि
ति माधवः । अन्ये तु गृहांतरमरणेपि त्र्यहमाहुः ॥ पितृव्यादीनां तु एकाहमेव । पितुर्गेहे कन्यायाः
प्रसवे पित्रोरेकाहः । माधवस्तु पित्रोर्गेहे कन्यायाः प्रसवमरणयोः पित्रोस्त्रिरात्रमेवापितृव्या
दीनां त्वेकरात्रमित्याह । सपिंडजनने उपनीतसपिंडमरणे च ब्राह्मणस्य दशाहं । क्षत्रियस्य द्वाद
श । वैश्यस्य पंचदश शूद्रस्य मासं । सच्छूद्रस्य पक्षं । कूटस्थमारभ्य सप्तपुरुषाः सपिंडाः । त
तस्सप्त समानोदकाः । तदुत्तरं गोत्रजा एवात्र समानोदके तु सन्ने उपनीते मृते च त्रिरात्रं । गोत्र
जे तु स्नानाच्छुद्धिः । तत्र सूत्याशौचं दशाहादुपरि जननज्ञाने नास्त्येवात्तत्रापि पितुः स्नानमेव । मृ
ताशौचं तु दशाहोपरि मासत्रयपर्यंतं मरणज्ञाने त्रिरात्रं । तत आषष्ठं पक्षिणी । तत आनवममहः
। ततः स्नानोदकदानाभ्यां शुद्धिरावर्षावर्षादूर्ध्वं तु स्नानमात्रं । इदं च सर्वं विज्ञानेश्वराद्यनुरोधे
नोक्तं । माधवमते तु त्रिपक्षावर्वाक् त्र्यहं । तत आषण्मासं पक्षिणी । तत आवर्षादहोरात्रं । तदू
र्ध्वं स्नानोदकदाने । इति बोध्यं । एतच्च त्रिरात्रादिकं समानदेश एव । देशांतरे तु स्नानमेवेति विज्ञा

द्धिपूर्वं भोजने भुक्ते ततः षडहमाशौचं ॥ असकृद्बुद्धिपूर्वं भुक्ते प्येतदेवाशौचं । प्रायश्चित्ते परं
विशेषः । आपदि तु बुद्धिपूर्वं भोजने पि दिनमाशौचं सजातीयस्योक्तं सजातीयस्य वाऽनुगमने
सचेलं स्नानं घृतप्राशनं च । ब्राह्मणस्य क्षत्रियानुगमने त्वहोरात्रं क्षत्रियस्य वैश्याऽनुगमने द्वे
वा । शूद्रानुगमने पक्षिणस्य शूद्राऽनुगमने तु त्रिरात्रं ॥ पराशरः । प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञा-
न दुर्बलः ॥ अनुगच्छेन्नीयमानं स त्रिरात्रेण शुध्यति । त्रिरात्रे तु ततश्चीर्णे नदीं गत्वा समुद्रगां ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति । धर्मार्थं मृतानाथब्राह्मणनिर्हरणे तु पदे पदेऽश्वमे-
धफलं । अवगाहनात्सद्यः शौचं । स्नेहादिना तु शवं निर्हृत्य तदीयमन्नमश्नाति तदीयगृहे एव वस-
ति दशाहेन शुद्धिः । तद्गृहवासमात्रे त्रिरात्रं । यस्तु तदीयमन्नमश्नाति न वा तद्गृहे वसति तस्यैका-
हं । ब्रह्मचारिणस्तु मातापितृव्यतिरिक्तशवनिर्हरणे व्रतलोपः । मातापितृनिर्हरणे प्याशौचिनाम-
न्नं ब्रह्मचारी नाश्नीयात्तैः सह न संविशेच्च । सूतके वर्तमाने तु द्वितीयसूतकं यदि । पूर्वेणैव तु
शुध्येत जाते जातं मृते मृतम् । मृतजातकयोगे तु या शुद्धिः सा निगद्यते ॥ मृते न शुध्यते जातं न मृ-
तं जातकेन तु ॥ अन्यत्रापि । शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी ॥ यदा तु पूर्वाशौचापेक्ष-
याऽधिकं कालव्यापि द्वितीयमापतति । यथा त्रिरात्रमध्ये दशाहं तत्र पूर्वशेषेण शुद्धिर्ना-
स्ति । यदि तु पूर्वप्रवृत्तमाशौचमुत्तराशौचकालादधिककालं स्यात्तदा पूर्वेणैवोत्तरशुद्धिः । त

3

राम

तुलपुत्राश्च विज्ञेया मातृबांधवाः॥३॥ इति। पाक्षिणी शब्दार्थस्तु दिनामरणेन दत्तः। अंतरा रात्रिः प
रघुश्च। रात्रौ मरणेऽनुसारात्रिः। अपरे तु रहोरात्रश्चेति हरदत्तेनोक्तः। आगामिवर्तमानाहर्युक्तायां
निशि पक्षिणी समरकोशव्याख्यायां क्षीरस्वामिनाप्युक्तं। पक्षाविव पक्षौ पूर्वोत्तरदिवसौ।
तन्मध्यवर्त्तिनी रात्रिः पाक्षिणी निशा द्वयमध्यगो दिवसोप्येवमिति॥ पाहताचल्यस्तु। गुर्वंते वास्यनू
चानूमातुलश्रोत्रियेषु चैकरात्रमाह। तथा असपिंडस्यापि यहे हेमरणं तद्गृहस्वामिनां त्रिरा
त्रमित्यंगिराः। एकरात्रमिति विष्णुः॥ तथा वसिष्ठेनेति॥ आहं माता महाचार्यश्रोत्रियेष्वशुचिर्भवे
त्॥ मैत्रेयीत्ताः। मातृष्वसा मातुलयोः श्वश्रूश्वसुरयोर्गुरौ। मृते च र्त्विजि याज्ये च त्रिरात्रेण विशुध्यती
ति॥ वसिष्ठः। संस्थिते पक्षिणी रात्रिर्दौहित्रे भगिनीसुते॥ संस्कृते तु रात्रिरात्रस्यादिति। विष्णुः
॥ आचार्यतत्पत्नीतत्पुत्रोपाध्यायमातुलश्वशुरश्वश्रूश्वसुर्यसहाध्यायिशिष्यपत्तीनेष्वेकरात्रे
णस्यादि। एते पंच गुरुलघुकल्पनासान्निध्यसन्निधिगुणवद्गुणाभावकर्त्रनुपकर्त्तभेदेन व्यव
स्थेयाः॥ एतच्चाचार्यादिमरणे त्रिरात्रादिकमन्यास्मिन्दाहकर्त्तरि। दाहकर्त्तुस्तु दशाहमे
व दिशाधिपत्तौ तु दिनमत्ते दिनं। रात्रिमत्ते तु रात्रिः। मानुषास्थिसरसे बुद्धिपूर्वे स्पर्शे त्रिदिनं। वि
रसे तु दिनं। अबुध्यानुसरसे स्पर्शे स्नानं। विरसे त्वाचमनं। प्रोक्षणं च। अमानुषास्थिस्पर्शे तु
सस्नेहे स्नानं। विरसे चाचमनं॥ आशौचिनोऽन्नेऽनापदि बुद्धिपूर्वे सकृद्भुक्ते यस्मिन्दिने भुक्तं ततः
शिष्टाहान्याशौचं। असकृद्बुद्धिपूर्वं भुक्ते यावत्तदेवाशौचं। प्रायश्चित्ते परं विशेषः। आपदि तु बु

मादिनाग्निमतां त्वस्थ्यादिभिः ॥ तस्याशौचं विधानं तत्कं कर्तव्या चोदकक्रियेति । वैधमरणे तु विशेषमा
ह शातातपः ॥ रुद्रः शौचाक्रियालुप्तः प्रत्याख्यातभिषक्क्रियाः । आत्मानं घातयेद्यस्तु भग्वग्न्यनशनां
बुभिः ॥ तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः ॥ तृतीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेदिति ॥
इदं चाशौचमाहिताग्नेरुपरमे संस्कारदिवसप्रभृति कर्तव्यं । अनाहिताग्नेस्तु मरणदिवस
प्रभृति । संचयनं तु प्रथमेह्नि तृतीये ह्नि सादिना विहितं । उभयोरपि संस्कारदिवसप्रभृत्येव । आ
हिताग्नेपि तद्दिशं नरमस्ते तस्तुत्रादीनामासंस्कारोपक्रमादाशौचं नास्ति । अनाहिताग्नेस्तु वि
धिवद्दाहाभावेत्र दानीमाशौचग्रहणं वैकालिकं । तत्र गृहीताशौचानां संस्कारकाले पुनस्त्र्यहं ।
अगृहीताशौचानां तु पूर्णं दशाहादेवापुत्राणां पत्न्याश्चैवं व्यवस्था । पत्नीसंस्कारे पसुश्चैवं । स
पत्नोर्मियश्चैवं । अगृहीताशौचानां सपिंडानां तु त्रिरात्रं । गृहीताशौचानां सपिंडानां तु पुनराशौ
चं नास्त्येव । आहिताग्नेस्तु प्रतिकृतिदाहे सपिंडानां दशाहमेव ॥ इदं चाशौचं द्विविधम् ॥ अस्पृश
त्वप्रयोजकं कर्मानधिकारलक्षणं च । पुत्रे जाते पितुः स्नानमस्पृश्यता । मातुर्दशाहं । सपिंडानां
तु अस्पृश्यता नास्त्येव किंतु कर्मानधिकारतामात्रम् । सूतिकायां तु पुत्रजनने सप्तविंशतिरात्रं कर्मा
नर्हा । कन्याजनने तु मासम् । पुत्रजन्मदिवसे पितुर्दानादेवचनादधिकारः । तथा च शंखलिखि
तौ ॥ कुमारप्रसवे नाभ्यामच्छिन्नायां दानप्रतिग्रहादिषु दोषस्तदहरित्येके इति । जन्मदारभ्यादि

राम

5

यथा गर्भपातानिमित्तषडहाशौचमध्ये यदि दशाहाशौचमापद्येत तदा षडहाशौचशेषेणैव
दशाहाशौचशुद्धिः। अत्र विशेषमाह गौतमः। रात्रिशेषे द्वाभ्यां। प्रभाते तिसृभिरिति। रात्रिमा
त्रशेषे पूर्वाशौचे यद्याशौचांतरं तर्हि पूर्वाशौचं समाप्यानंतरं द्वाभ्यां रात्रिभ्यां शुद्धिः। तस्याए
व रात्रेः पश्चिमयामे त्वाशौचांतरे तिसृभी रात्रिभिः शुद्धिर्न तु तच्छेषमात्रेणेति विज्ञानेश्वरः।।
माधवस्तु। नवमे दिवसे पूर्णे यद्याशौचांतरं तदा पूर्वाशौचकालानंतरं द्वाभ्यां रात्रिभ्यां शुद्धिः।
ष्या रात्रेः परेद्युश्चेत्सर्पः। प्रभाते प्रभातं तरत्ति तु प्राग्वदित्याह। हरदत्तस्तु। पूर्वस्मिन्नाशौचे
रात्रिशेषे सति यद्यन्यदापतेत्तदा द्वाभ्यां शुद्धिः। सा रात्रेः परेद्युश्चेत्सर्पः। प्रभाते तिसृभि
रिति। अथ दशाहादौ व्यतीते अपरेद्युः प्रभाते संगवे यद्यन्यदापतेत्तत्र तिसृभी रात्रि
भिरिति। पित्राशौचमध्ये मातरि मृतायां पूर्वाशौचं समाप्य पक्षिणीमधिकां कुर्यात्। मात्राशौ
चमध्ये पितृमरणे तु पित्राशौचं पूर्णमस्त्येव। यदि तु पित्राशौचे रात्रिशेषे माता म्रियेत तदा
पक्षिणी द्व्यहयोर्विकल्प इति केचित्। द्व्यह एवेत्यन्ये।। अथाशौचनिषेधः।। न संशयं प्रपद्येते
ति शास्त्रमुक्तं। यश्च महानदीतरणादौ प्रवृत्तः सन् यो म्रियेत तस्य दशाहाशौचादि न कार्यं।
संवत्सरानंतरं नारायणबलिं कृत्वा सर्वमौर्ध्वदैहिकं कार्यमेव। सर्पहते सौवर्णनागं प्रस
स्तां गां च दद्यादित्यधिकं। प्रमादमरणे त्वाशौचादिकमस्त्येव। तथा चांगिराः। यदि कश्चित्

५

यनापूज्यायामपिप्रथमषष्ठदशमदिवसेषुवचनादधिकारः।मृताशौचेतुसर्वेषामस्पृश्यत्वमोस्त
र्गिकम्।स्वस्वाशौचविभागादूर्ध्वंतुस्पृश्याः।यतीनांब्रह्मचारिणांचनाशौचम्।समावर्त्तनानंतरं
तुप्राप्तानांसपिंडानामुदकदानंनस्नात्वात्रिरात्रमाशौचंकुर्यादेवंपित्रादिभ्यः उदकदानादिकंकुर्व
न्ब्रह्मचारीआशौचमपिलभते।।तदुक्तंत्रिशच्छेकंया।।तत्तांवाचार्यकेभ्योऽनलमतिलजलदोब्रह्म
चारीनदीयाशौचइत्ति।।प्रक्रांतप्रायश्चित्तानामाशौचंनास्ति।पूर्वप्रवृत्तचौलोपनयनादिसंस्कारे
षुयज्ञदेवताप्रतिष्ठारामाद्युत्सर्गादिष्वप्येवमिति।। ।।इतिश्रीपदवाक्यप्रमाणज्ञश्रीलक्ष्मी
धरसूरेःसूनुनामहोजिदीक्षितेनरचितआशौचनिर्णयःसंपूर्णः।। ।। ।। ।।

राम